तर्क-संग्रह



प्रकाशक

संस्कृत लहरी संस्था, पुणे, भारत

सम्पादक

आदिनाथ शास्त्री

(संस्कृत, योग, वास्तु, ज्योतिष शास्त्र तथा प्राण विद्या के मर्मज्ञ)

मूल्य – संस्कृत सेवार्थ

द्वितीय संस्करण 2021

Whats App - https://wa.me/917588094317 Email – sanskritlahari@gmail.com

मंगलाचरण

नमस्ते शारदे देवि वीणापुस्तकधारिणी ।
विद्यारम्भं करिष्यामि प्रसन्न भव सर्वदा ॥

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

अनुमान

प्रकरण

अनुमिति–करणम् =अनुमानम्



अनुमितिः लक्षणम्

परामर्श–जन्यं ज्ञानम् =अनुमितिः ।

परामर्श → ज्ञानम् ⟷ अनुमितिः

→ पर्वतो वह्निमान्

परामर्श लक्षणम्

व्याप्ति–विशिष्ट–पक्षधर्मता–ज्ञानं = परामर्शः

यथा 'वह्निव्याप्य धूमवान् अयं पर्वत'

इति ज्ञानं परामर्शः ।

अनुमिति लक्षणम्

तज्जन्यं पर्वतो वह्निमान् इति ज्ञानम् अनुमितिः।

तद् = परामर्शः जन्यं

पर्वतो वह्निमान् इति

ज्ञानम् अनुमितिः।

व्याप्ति लक्षणम्

यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः

साहचर्य

व्याप्य ⟷ व्यापक

धूम = धुँआ वह्नि = अग्नि

पक्ष–धर्मता लक्षणम्

व्याप्यस्य पर्वतादि–वृत्तित्वं पक्षधर्मता ।

व्याप्य = धूम धुँआ

पक्ष = पर्वत

पक्षधर्मता = पर्वते धूम

पक्ष – सपक्ष – विपक्ष

सन्दिग्धसाध्यवान् **पक्षः** ।

यथा धूमवत्त्वे हेतौ **पर्वतः** ।

निश्चित–साध्यवान् **सपक्षः**,

यथा तत्रैव **महानसम्** ।

निश्चितसाध्या–भाववान् **विपक्षः**,

यथा तत्रैव **महाह्रदः** ।



व्याप्ति–विशिष्ट → यत्र यत्र धूमस्तत्र तत्राग्नि

पक्षधर्मता–ज्ञानं → पर्वतो धूममान्

परामर्शः → यत्र यत्र धूमस्तत्र तत्राग्निं ज्ञात्वा
पर्वते धूमं दृष्ट्वा

अनुमितिः → पर्वतो वह्निमान् धूमवत्त्वात् सिद्धांत

अनुमान प्रकार

अनुमानं द्विविधम्–स्वार्थं परार्थं च ।



स्वार्थ–अनुमानम्

तत्र स्वार्थं स्वानुमितिहेतुः ।

तथाहि स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निः' इति महानसादौ व्याप्तिं गृहीत्वा ➡ पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् ➡ व्याप्तिं स्मरति 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति । ➡ तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते।➡ तस्मात् 'पर्वतो वह्निमान्' इति ज्ञानमनुमिति–रुत्पद्यते। तदेतत् स्वार्थानुमानम् ।

परार्थ–अनुमानम्

यत्तु स्वयं धूमात् अग्निम् अनुमाय परं प्रति बोधयितुं पञ्च–अवयव–वाक्यं प्रयुङ्क्ते तत्परार्थानुमानम् ।

यथा → पर्वतो वह्निमान् → धूमवत्त्वात्,

→ यो यो धूमवान् स स वह्निमान् यथा महानसम्,

→ तथा चायम्, → तस्मात् तथा इति ।

अनेन प्रतिपादितालिङ्गात् → परोऽग्निं प्रतिपद्यते

परार्थ–अनुमानम्

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः।

पर्वतो वह्निमान् इति **प्रतिज्ञा** । धूमवत्त्वादिति **हेतुः** ।

यो यो धूमवान् स सोऽग्निमान् यथा महानसम् इति **उदाहरणम्** ।

तथा चायमिति **उपनयः** । तस्मात्तथा इति **निगमनम्** ।

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम् ।

तस्माल्लिङ्गपरामर्शो ऽनुमानम् ।

प्रतिज्ञा → पर्वतो वह्निमान् ।

हेतुः → धूमवत्त्वात् ।

उदाहरणम् → यो यो धूमवान् स सोऽग्निमान्
यथा महानसम्

उपनयः → तथा चायम् ।

निगमनम् → तस्मात् तथा ।

लिङ्ग – प्रकार

लिङ्ग त्रिविधम्–अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति



अन्वय–व्यतिरेकि लिङ्ग

अन्वयेन व्यतिरेकेण च व्याप्तिमद् → अन्वय–व्यतिरेकि ।

→ यथा वह्नौ साध्ये धूमवत्त्वम् ।

यत्र धूमस्तत्राग्निः यथा महानसम् इति अन्वयव्याप्तिः ।

यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा महाह्रद इति व्यतिरेकव्याप्तिः

यत्र धूमः तत्र अग्नि

यत्र वह्निः नास्ति

तत्र धूमोऽपि नास्ति

केवल–अन्वयि लिङ्ग

अन्वय–मात्र–व्याप्तिकं ➡ केवलान्वयि लिङ्ग

यथा ➡ घटोऽभिधेयः, प्रमेयत्वात्, पटवत् इति ।

अत्र प्रमेयत्वाभिधेयत्वयो व्यतिरेकव्याप्तिः नास्ति,

सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च

घटः अभिधेयः, प्रमेयत्वात्

⬅

यत्र प्रमेयत्व तत्र अभिधेयत्व

पटवत् ➡

केवल–व्यतिरेकि लिङ्ग

व्यतिरेक–मात्र–व्याप्तिकं ➡ केवल–व्यतिरेकि लिङ्ग ।

यथा ➡ पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् ।

यदितरेभ्यो भिद्यते तद् गन्धवत्, यथा.....।

यदितरेभ्यो न भिद्यते तद् न गन्धवत्, यथा जल । न चेयं तथा। तस्मान्न तथेति

अत्र 'यद्गन्धवत्तदितरभिन्नम्' इत्यन्वयदृष्टान्तो नास्ति

पृथिवीमात्रस्य पक्षत्वात् ।

पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्

पक्ष – सपक्ष – विपक्ष

सन्दिग्धसाध्यवान् **पक्षः** ।

यथा धूमवत्त्वे हेतौ **पर्वतः** ।

निश्चितसाध्यवान् **सपक्षः**,

यथा तत्रैव **महानसम्** ।

निश्चितसाध्या–भाववान् **विपक्षः**,

यथा तत्रैव **महाह्रदः** ।

हेतु-आभास

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।



सव्यभिचार

सव्यभिचारोऽनैकान्तिकः ।

सः त्रिविधः– साधारणा–साधारणाऽनुपसंहारिभेदात्

साधारण

तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः ।

यथा पर्वतो वह्निमान् प्रमेयत्वात् इति ।

अत्र प्रमेयत्वस्य वह्न्यभाववति (साध्याभाववति) ह्रदे विद्यमानत्वात्

प्रमेयत्वात्

पर्वतो वह्निमान्

साध्या–भाववान् विपक्षः महाह्रदः

असाधारण VIP

सर्वसपक्ष–विपक्ष–व्यावृत्तः केवल–पक्षमात्रवृत्तिः असाधारणः

यथा ➡ शब्दो नित्यः शब्दत्वात् इति ।

शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्यभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति

VIP

शब्दत्वं

अन्यत्र ✗ अभाव

अनुपसंहारी

अन्वय–व्यतिरेक–दृष्टान्त–रहितः अनुपसंहारी

यथा ➡ सर्वम् अनित्यं प्रमेयत्वात्

अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ।

विरुद्ध

साध्याभावव्याप्तो हेतुर्विरुद्धः ।

यथा ➡ शब्दो नित्यः कृतकत्वाद्, घटवत् इति

(अत्र) कृतकत्वं हि नित्यत्व अभावेन अनित्यत्वेन व्याप्तम् ।

शब्दो

नित्यः

कृतकत्वाद्

घटवत्

सत्प्रतिपक्ष

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः ।

यथा ➡ शब्दो **नित्यः** श्रावणत्वात् शब्दत्ववत् इति,

शब्दो **अनित्यः** कार्यत्वाद् घटवत् इति ।

शब्दो

नित्यः

श्रावणत्वाद्

शब्दत्ववत्

शब्दो

अनित्यः

कार्यत्वाद्

घटवत्

असिद्ध

असिद्धस्त्रिविधः– आश्रयासिद्धः, स्वरूपासिद्धो, व्याप्यत्वासिद्धः च इति



आश्रय–असिद्ध

आश्रयासिद्धो यथा

गगनारविन्दं सुरभि **अरविन्दत्वात्** सरोजारविन्दवत् ।

अत्र गगनारविन्दमाश्रयः, स च नास्त्येव ।

स्वरूप–असिद्ध

स्वरूपासिद्धो यथा

शब्दो गुणः चाक्षुषत्वात्

अत्र चाक्षुषत्वं शब्दे नास्ति ✗

शब्दस्य श्रावणत्वात् । ✓

व्याप्यत्व–असिद्ध

सोपाधिको हेतुर्व्याप्यत्वासिद्धः ।

साध्यव्यापकत्वे सति साधना–व्यापकत्वम् उपाधिः ।

साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्

साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधन–अव्यापकत्वम् ।

यथा – पर्वतो धूमवान् वह्निमत्त्वात् इति अत्र

आर्द्रेन्धनसंयोग उपाधिः

तथाहि यत्र धूमस्तत्रान्द्रेन्धनसंयोग इति साध्यव्यापकत्वम् ।

यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति,
अयोगोलके आर्द्रेन्धनसंयोगा–भावादिति साधनाव्यापकत्वम् ।

एवं साध्यव्यापकत्वे सति साधना–व्यापकत्वाद्
आर्द्रेन्धनसंयोग उपाधिः ।

सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ।

बाधित

यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः स बाधितः

यथा ➡ **वह्निः** **अनुष्णो** **द्रव्यत्वात्** इति ।

अत्र अनुष्णत्वं साध्यम्,

तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्

अनुष्ण ➡ **चाक्षुषत्वात्**

उष्णत्वं ➡ स्पार्शनप्रात्यक्षेण

प्रार्थना

ॐ पूर्णमदः पूर्णमिदं
पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय
पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः

सम्पादक — आदिनाथ शास्त्री

(संस्कृत, योग, प्राण विद्या तथा वास्तु-शास्त्र के मर्मज्ञ)

प्रकाशक — संस्कृत लहरी संस्था, पुणे, महाराष्ट्र, भारत

What's App - https://wa.me/917588094317

Email – sanskritlahari@gmail.com

मूल्य – संस्कृत सेवार्थ **द्वितीय संस्करण 2021**

सर्वाधिकार प्रकाशकाधीन